श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

महादेव कृतम्

# ॥ श्रीहयग्रीवकवचम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीहयग्रीवकवचम् ॥

पार्वत्युवाच
देव देव महादेव करुणाकर शङ्कर।
त्वया प्रसाद शीलेन कथितानि रमापतेः॥ १ ॥

बहूनामवताराणां बहूनि कवचानि च।
इदानीं श्रोतुमिच्छामि हयास्य कवचं विभो॥ २ ॥

शिव उवाच
देवि प्रियं वदे तुभ्यं रहस्यमपि मत्प्रिये।
कलशाम्बुधिपीयूषं हयास्य कवचं वदे॥ ३ ॥

महाकल्पान्तयामिन्यां सञ्चरंस्तु हरिः स्वयम्।
लीलया हयवक्त्राख्य रूपमास्थाय योऽहरत्॥ ४ ॥

पुत्र वात्सल्यतो मह्यं विरिञ्चिरुपदिष्टवान्।
हयास्य कवचस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः॥ ५ ॥

छन्दोऽनुष्टुप् तथा देवो हयग्रीव उदाहृतः।
ह्रौं बीजं तु समाख्यातं ह्रीं शक्तिस्समुदाहृता।
ओं कीलकं समाख्यातमुच्चैरुत्कीलकं तथा॥ ६ ॥

लक्ष्मीकराम्भोरुह हेमकुम्भ पीयूषपूरैरभिषिक्त शीर्षम्।
व्याख्याक्षमालाम्बुज पुस्तकानि हस्तैर्वहन्तं हयतुण्डमीडे॥ ७ ॥

सुधासिक्तश्शिरः पातु फालं पातु शशिप्रभः।
दृशौ रक्षतु दैत्यारिः नासां वाग्जृम्भवारिधिः॥ ८ ॥

श्रोत्रं पातु स्थिरश्रोत्रः कपोलौ करुणानिधिः।
मुखं पातु गिरां स्वामी जिह्वां पातु सुरारिहृत्॥ ९ ॥

www.prapatti.com

हनूं हनुमतस्सेव्यः कण्ठं वैकुण्ठनायकः।
ग्रीवां पातु हयग्रीवः हृदयं कमलाकरः॥ १० ॥

उदरं विश्वभृत् पातु नाभिं पङ्कजलोचनः।
मेढ्रं प्रजापतिः पातु ऊरू पातु गदाधरः॥ ११ ॥

जानुनी विश्वभृत् पातु जङ्घे च जगतां पतिः।
गुल्फौ पातु हयध्वंसी पादौ विज्ञानवारिधिः॥ १२ ॥

प्राच्यां रक्षतु वागीशः दक्षिणस्यां वरायुधः।
प्रतीच्यां विश्वभृत् पातु उदीच्यां शिववन्दितः॥ १३ ॥

ऊर्ध्वं पातु हरिस्साक्षात् अधः पातु गुणाकरः।
अन्तरिक्षे हरिः पातु विश्वतः पातु विश्वसृट्॥ १४ ॥

य एतत्कवचं धीमान् सन्नह्येन्निजविग्रहे।
दुर्वादिराक्षसव्यूहैः स कदाचिन्न बाध्यते॥ १५ ॥

पठेत् य एतत् कवचं त्रिसन्ध्यं भक्ति भावितः।
मूढोऽपि गीष्पतिस्पर्धी जायते नात्र संशयः॥ १६ ॥

॥ इति श्रीहयग्रीवकवचम् संपूर्णम् ॥

www.prapatti.com